# सुन्दरकाण्ड षष्टितमः सर्गः (६०) - ॥ अङ्गदजाम्बवत्संवादः ॥

तस्य तद्वचनं श्रुत्वा वालि सूनु रभाषत ।
ताम् लङ्काम् तरसा हन्तुम् रावणम् च महाबलम्॥ १॥

किम् पुनः सहितैर् वीरैर् बलवद्भिः कृतात्मभिः |
कृतास्त्रैः प्लवगैः शक्तैर् भवद्भिर् विजयैवशिभिः ॥ २ ॥

दृष्टा देवी न चानीता इति तत्र निवेदनम् ।
अयुक्तमिव पश्यामि भवद्भिः ख्यात विक्रमैः ॥ ३ ॥

न हि नः प्लवने कश्चिन् नापि कश्चित् प्राक्रमे ।
तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ४ ॥

तेष्वेवं हत वीरेषु राक्षसेषु हनूमता ।
किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ५ ॥

तमेवं कृत सङ्कल्पं जाम्बवान् हरि सत्तमः ।
उवाच परमप्रीतो वाक्यमर्थ वदर्थवित् ॥ ६ ॥

न तावदेषा मतिरक्षमा नो
यथा भवान्पश्यति राजपुत्रः ।
यथा तु रामस्य मतिर् निविष्टा
तथा भवान् पश्यतु कार्य सिद्धिम् ॥ ७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥